# Shri Sharadadevi Stotram

# श्रीशारदादेवीस्तोत्रम्

## Document Information

Text title : Shri Sharadadevi Stotram

File name : shAradAdevIstotram2.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kalipada Bandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशारदादेवीस्तोत्रम्

या देवी मर्त्यदेहेऽमरगण-विरल-ज्योतिषा दीप्यमाना
यस्याः पुण्य प्रभावैरगणित-मनुजा दर्शिता मुक्तिमार्गम् ।
यस्याः पीयूषवाणी निखिल-तनुभृतां सर्वसन्ताप-हन्त्री
श्री माँ-रूपेण नृणां नियत-हितकरीं शारदां तां नमामि ॥ १॥

पत्युः स्थानं व्रजन्ती स्वजन-परिहृता प्रान्तरे भीमदस्यूं
"कन्याऽहं शारदा ते त्वमसि मम पिता रक्षणीया त्वयाऽहम् ।"
इत्युक्त्वा दस्युचित्तं कुलिश-सुकठिनं कोमलं या चकार
श्री माँ-रूपेण मह्यां धृततनुमभयां शारदां तां नमामि ॥ २॥

त्यक्त्वा भोगस्य मार्गं पतिगत-हृदया तद्व्रते चैकनिष्ठा
पूर्णं कर्तुं व्रतं तद् विगलित-चिकूरा मातृभावाश्रिता या ।
पत्युः पूजामगृह्णाज्जगति निरुपमां षोडशी सिद्धिदात्री
श्री माँ-ख्यां विश्ववन्द्यां गिरिवर-तनयां शारदां तां नमामि ॥ ३॥

भक्तानां मातृरूपां सततमभयदां सर्वकल्याणकामां
पत्यूरुग्णस्य सेवामनलस-मनसा कुर्वतीं क्लान्तिहीनाम् ।
आतिथ्ये मुक्तहस्तां सुनिपुण-गृहिणीमब्धि जाता-स्वरूपां
श्री माँ-ख्यां विश्वरूपामभिमत-वरदां शारदामर्चयामि ॥ ४॥

लब्ध्वा मातृत्व-सम्पद्-बहुसुकृतिफलं योषितः पूर्णकामा-
स्तस्मात् सन्तानचिन्ता मनसि समुदिता सा तु तत्रैव लीना ।
सङ्ख्यातीतान् सुपुत्रान् निज-तनुज-निभान् प्राप्य यासीत्कृतार्था
कल्याणीं शुद्धसत्त्वां जनगणजननी शारदां तां नमामि ॥ ५॥

प्रणत-हृदयपद्म-न्यस्तपादाब्जयुग्मा
मधुरवचनगर्भां बिभ्रती कण्ठवीणाम् ।
रुचिरविमलकान्तिर्ज्ञानभक्तिप्रदात्री
निखिलभुवन पूज्या शारदा शारदैव ॥ ६॥

जयतु जयतु देवी ध्यानगम्भीरमूर्ति-
    र्जयतु जयतु देवी साधकाभीष्टदात्री ।
जयतु जयतु देवी रामकृष्णस्य शक्ति-
    र्जयतु जयतु देवी शारदा विश्वधात्री ॥ ७॥

वैकुण्ठे विष्णु पार्श्वे विहरति कमला विश्वकल्याणदात्री
    कैलाशे शम्भुवासे विहरति गिरिजा लोकरक्षा-विधात्री ।
जाह्नव्यां पुण्यतीर्थे मणिमय-भवने कालिका-पादपद्मे
    राजते ध्यानमग्नौ मम हृदयनिधौ शारदा-रामकृष्णौ ॥ ८॥

इति श्रीकालीपदबन्द्योपाध्यायविद्याविनोदेनविरचितं
"श्रीश्रीशारदादेवीस्तोत्रम्" सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Sharadadevi Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*